**SA-I (CLASS-VII)** 9/2012

**विषयः संस्कृतं**

**अवधिः - होरात्रयम्** **पूर्णाङ्काः - 80**

*निर्देशाः -*
*(1) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*
*(2) प्रतिखण्ड-उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।*
*(3) प्रत्येकं खण्डं अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*
*(4) प्रश्नपत्रे उत्तराणि न लेखनीयानि।*
*(5) प्रश्नसंख्या प्रश्नपत्रानुसारं अवश्यमेव लेखनीया।*
*(6) सर्वेषां प्रश्नानां उत्तराणि संस्कृतेन लेखनीयानि।*

**खण्डः - 'क' (अपठित-अवबोधनम्)** **अङ्काः 10**

प्र1. अधोलिखितम् अनुच्छेदम् पठित्वा प्रदत्तप्रश्नानां उत्तराणि लिखत -

भारतवर्षम् अस्माकं देशः अस्ति। वेदाः अत्र जाताः। रामः कृष्णः महात्माबुद्धः च अत्र जाताः। एषः देशः गान्धेः, सुभाषस्य, विवेकानन्दस्य च अस्ति। अस्माकं देशः अतिविशालः अस्ति। अत्र अनेके पर्वताः सन्ति। तेषु पर्वतेषु केचन पर्वताः अत्युन्नताः सन्ति। एषः देशः उत्तरदिशायां हिमालयेन रक्षितः। हिमालयात् अनेकाः नद्यः प्रवहन्ति। सर्वासु नदीषु गंगा श्रेष्ठा पवित्रतमा च मन्यते। गंगा नदी हिमालयात् निःसृत्य बंगोपसागरे पतति। गंगायाः तटे अनेकानि तीर्थस्थानानि प्राचीननगराणि च सन्ति। वर्षर्तौ नद्याः जलेन कृषकाः कृषिकार्यं कुर्वन्ति अन्नं च उत्पादयन्ति। अस्माकं देशे जनाः न केवलं कृषिकार्ये जलस्य उपयोगं कुर्वन्ति अपितु नद्याः जलं पिबन्ति। अत्र जनाः नद्याः पूजनं अपि कुर्वन्ति।

I. एकपदेन उत्तरत - (4x½=2)
- (i) अस्माकं देशः उत्तरदिशायां केन रक्षितः?
- (ii) जनाः कस्याः पूजनम् अपि कुर्वन्ति?
- (iii) अत्र अनेके के सन्ति?
- (iv) सर्वासु नदीषु का श्रेष्ठा पवित्रतमा च मन्यते?

II. पूर्णवाक्येन उत्तरत - (2x2=4)
- (i) गंगायाः तटे अनेकानि कानि सन्ति?
- (ii) हिमालयात् अनेकाः काः प्रवहन्ति?

III. यथानिर्देशं उत्तरत - (4x½=2)
- (i) 'सलिलम्' अस्य पदस्य पर्यायपदम् चित्वा लिखत?
- (ii) 'कृषकाः' अस्य कर्तृपदस्य क्रियापदम् किम्?
- (iii) 'अनेकानि तीर्थस्थानानि' अत्र विशेष्यपदम् किम् अस्ति?
- (iv) 'कूले' इत्यर्थे किम् पदम् अत्र प्रयुक्तम्?

IV. अस्य अनुच्छेदस्य कृते उचितं शीर्षकं लिखत। (2)

अङ्काः 15

## खण्डः - 'ख' (रचनात्मकं कार्यम्)

प्र2. अधः प्रदत्तं चित्रं आधृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चसंस्कृतवाक्यानि लिखत - (1

मञ्जूषा
सूर्यः, बालकाः, कन्दुकम्, मोटरयानम्, पिंजरे, पर्यटनस्थलम्, पादकन्दुकम्, नीडम्, नौका, खगः, वृक्षः




प्र3. भवतः नाम सक्षमः अस्ति छात्रावासे च भवान् वसति। अजन्ता-एलोरा-गुहासु शैक्षिकयात्रायै गन्तुम् इच्छति। धनप्रेषणार्थम् पितरं प्रति लिखितं पत्रं मञ्जूषादत्त शब्दैः पूरयित्वा उत्तरपुस्तिकायाम् पुनः लिखत - (10x½=5)

मञ्जूषा
निवेदयामि, प्रियपुत्रः, शैक्षिकयात्रायाः, आयोजिता, पञ्चशतम्, दिल्लीतः, शरदवकाशे, जनन्यै, उत्तरपत्राणि, पितृमहाभागाः

22, रंगनाथन् छात्रावासः

(1)__________

तिथिः__________

परमादरणीयाः (2)__________

सादरं प्रणमामि।

सविनयं (3)__________ यत् मम त्रैमासिकी परीक्षा समाप्तिं गता। मम (4)__________ शोभनानि अभवन्। अस्मिन् (5)__________ अहं गृहं न आगमिष्यामि यतः विद्यालयेन एकस्याः (6)__________ प्रबन्धः कृतः। एषा यात्रा अजन्ता-एलोरा-गुहानां दर्शनाय (7)__________ अस्ति। यात्रा-व्ययार्थम् (8) __________ रुप्यकाणि प्रेषयन्तु भवन्तः। शेषं सर्वं कुशलं। मम (9)__________ अग्रजाय च सादरम् प्रणामाः।

भवदीयः (10) __________

सक्षमः



## खण्डः - 'ग' (अनुप्रयुक्तव्याकरणम्)

अङ्काः 25

प्र4. मञ्जूषायां दत्तैः अव्ययपदैः वाक्यपूर्तिम् कुरुत - (6)

मञ्जूषा
अधः, श्वः, उच्चैः, कदापि, ह्यः, बहिः

(i) रावणः ________ अहसत्।

(ii) आज्ञां विना ________ मा गच्छ।

(iii) पक्वानि फलानि ________ अपतन्।

(iv) ________ अवकाशः नास्ति।

(v) अहं ________ क्रिकेटं न क्रीडामि।

(vi) मोहनः ________ ग्रामम् अगच्छत्।

प्र5. उचितशब्दरूपैः वाक्यानि पूरयित्वा वाक्यानि पुनः लिखत - (7)

(i) गंगा यमुना च द्वे ________ अत्र वहतः। (नदी)

(ii) ________ किञ्चित् अस्ति। (मधु - सप्तमी विभक्तिः, एकवचनं)

(iii) ________ पिता कृषकः अस्ति। (तद् पुंल्लिंग)

(iv) ________ पुष्पाणि सुन्दराणि सन्ति। (तद्)

(v) वयं ________ भोजनं यच्छामः। (तद् - चतुर्थी विभक्ति, एकवचनं)

(vi) ________ मीनाः तरन्ति। (नदीम्/नद्याम्/नद्याः)

(vii) अहम् ________ सह दुग्धम् पिबामि। (मधु/मधुनि/मधुना)

प्र6. उचितधातुरूपैः वाक्यानि पूरयित्वा पुनः लिखत - (7)

(i) जनाः पत्रम् ________। (लिख् - लृट् लकारे)

(ii) सः मम मित्रम् ________। (अस् - लङ् लकारे)

(iii) तौ कौ ________? (अस्)

(iv) आवाम् स्वपुस्तकं ________। (पठ्)

(v) बालिका कलमेन शोभनम् ________। (लिख् - लङ् लकारे)

(vi) कक्षायाम् छात्राः पुस्तकानि ________। (पठ्)

(vii) आगामी-दिवसेषु मम मित्रं कदापि भोजनं न ________। (चोरयति/चोरयिष्यति/अचोरयत्)

(5)

प्र7. निम्नवाक्यानि शुद्धं कृत्वा पुनः लिखत - 1

(i) वृक्षे हरितः शुकौ तिष्ठतः।

(ii) श्वः अहम् विद्यालयम् न गच्छामि।

(iii) ते उद्याने भ्रमामः।

(iv) मृगः उद्याने चरन्ति।

(v) वृक्षेण पत्राणि पतन्ति।

अङ्काः 30

## खण्डः - 'घ' (पठित-अवबोधनम्)

(5)

प्र8. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -

काष्ठदण्डे लम्बमानं कूर्मं दृष्ट्वा गोपालकाः पश्चाद् अधावन् अवदन् च "हंहो! महदाश्चर्यम्। हंसाभ्याम् सह कूर्मोऽपि उड्डीयते।" कश्चिद् वदति - "यद्ययं कूर्मः कथमपि निपतति तदा अत्रैव पक्त्वा खादिष्यामि।" अपरः अवदत् - "सरस्तीरे दग्ध्वा खादिष्यामि।" अन्यः अकथयत् - "गृहं नीत्वा भक्षयिष्यामि" इति। तेषां तद् वचनं श्रुत्वा कूर्मः मित्रयोः दत्तं वचनं विस्मृत्य कोपेन अवदत् - "यूयं भस्म खादत" इति वदन्नेव कूर्मः आकाशात् पतितः गोपालकैः मारितश्च।

I. एकपदेन उत्तरत - (2x½=1)

(i) लम्बमानं कूर्मं दृष्ट्वा के अधावन्?

(ii) आकाशात् कः पतितः?

II. पूर्णवाक्येन उत्तरत - (2x1=2)

(i) लम्बमानं कूर्मं दृष्ट्वा गोपालकाः किम् अवदन्?

(ii) कूर्मः मित्रयोः वचनं विस्मृत्य किम् अवदत्?

III. यथानिर्देशम् उत्तरत - (4x½=2)

(i) 'अपरः' अस्य पर्यायपदं गद्यांशात् चित्वा लिखत।

(ii) 'अधावन्' इति क्रियापदस्य कर्तृपदम् किम् अस्ति?

(iii) 'दत्तं वचनम्' अनयोः पदयोः विशेष्यपदं किम् अस्ति?

(iv) 'खादिष्यामि' इत्यर्थे कः शब्दः अत्र प्रयुक्तः?

प्र9. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानां उत्तराणि लिखत - (5)

सत्येन धार्यते पृथ्वी सत्येन तपते रविः।<br>
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम्॥

I. एकपदेन उत्तरत - (2x½=1)

(i) सत्येन कः तपते?

(ii) वायुः केन वाति?



II. पूर्णवाक्येन उत्तरत - (2x1=2)

(i) सत्येन का धार्यते?

(ii) सर्वं कस्मिन् प्रतिष्ठितम्?

III. यथानिर्देशम् उत्तरत - (4x½=2)

(i) 'सूर्यः' अस्य पदस्य पर्यायपदं चित्वा लिखत।

(ii) 'वाति' अस्य क्रियापदस्य कर्तृपदम् किम् अस्ति?

(iii) 'आकाशः' अस्य पदस्य किम् विलोमपदम् अत्र प्रयुक्तम्?

(iv) 'वहति' इत्यर्थे कः शब्द अत्र प्रयुक्तः?

प्र10. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत - (5)

धुन्धः - अरे! भवन्तः जानन्ति एव यद् आधुनिकाः वैज्ञानिकाः प्लूटो- ग्रहं न स्वीकुर्वन्ति। तेषां मते अष्ट एव ग्रहाः, किन्तु मन्मतेन दश ग्रहाः सन्ति।

अयि! कविधुरन्धर! कस्तावत् दशमो ग्रहः? अस्माभिः कदापि न श्रुतम्। तस्य च कः प्रभावः?

धुन्धः - सावधानमनसा शृण्वन्तु भवन्तः दशमग्रहस्य वैशिष्ट्यम् -

सदा वक्रः सदा क्रूरः सदा मानधनापहः।<br>
कन्याराशिस्थितो नित्यं जामाता दशमो ग्रहः॥

*(काव्यपाठश्रवणेन उत्प्रेरितः एकः बालकोऽपि आशुकवितां रचयति सहासं श्रावयति च)*

I. एकपदेन उत्तरत - (2x½=1)

(i) आधुनिकवैज्ञानिकानाम् मते कति एव ग्रहाः?

(ii) एकः बालकः काम् रचयति?

II. पूर्णवाक्येन उत्तरत - (2x1=2)

(i) दशमः ग्रहः कः?

(ii) प्लूटो ग्रहं के न स्वीकुर्वन्ति?

III. यथानिर्देशम् उत्तरत - (4x½=2)

(i) 'अश्रुतम्' अस्य किम् विलोमपदम् अत्र प्रयुक्तम्?

(ii) 'निष्ठुरः' इत्यर्थे किं पदम् अत्र प्रयुक्तम्?

(iii) 'जानन्ति' क्रियापदस्य कर्तृपदम् किम्?

(iv) 'कुटिलः' अस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

प्र11. अधोलिखितश्लोकस्य अन्वयं उचितपदक्रमेण पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत - (4x1=4)

सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम्।<br>
सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत्॥

अन्वयः - सद्भिः सह (1) _________ आसीत सद्भिः (2) _________ कुर्वीत विवादं (3) _________ न सद्भिः (कुर्यात्) असद्भिः (4) _________ न आचरेत्।

प्र12. अधोलिखितवाक्येषु रेखांकितपदम् आधृत्य प्रश्ननिर्माणं कुरुत - (4x1=4)

(i) अत्र एकः <u>अपायः</u> अपि वर्तते।

(ii) कृष्णमूर्तिः <u>श्रीकण्ठस्य</u> आतिथ्यम् अकुर्वन्।

(iii) एतदर्थं मन्त्री <u>धनम्</u> ददाति।

(iv) <u>अनारिका</u> गृहं प्रत्यागच्छत्।

प्र13. अधोलिखितानि वाक्यानि घटनाक्रमानुसारेण पुनः लिखत - (8x½=4)

(i) एकदा श्रीकण्ठः कृष्णमूर्तेः गृहम् अगच्छत्।

(ii) स्वावलम्बी कृष्णमूर्तिः अवदत् - मम गृहे अपि अष्ट कर्मकराः सन्ति।

(iii) कृष्णमूर्तिः श्रीकण्ठः च मित्रे आस्ताम्।

(iv) स्वालम्बने सर्वदा सुखमेव भवति कदापि कष्टं न भवति।

(v) श्रीकण्ठः अवदत् - अहं भवतां आतिथ्येन सन्तुष्टः अस्मि।

(vi) श्रीकण्ठस्य पिता समृद्धः आसीत्।

(vii) परं कृष्णमूर्तेः पिता कृषकः आसीत्।

(viii) कृष्णमूर्तिः तस्य माता पिता च स्वशक्त्या श्रीकण्ठस्य आतिथ्यम् अकुर्वन्।

प्र14. अर्थैः सह शब्दानाम् मेलनं कृत्वा उत्तरपुस्तिकायां पुनः लिखत - (6x½=3)

| शब्दाः | अर्थाः |
|---|---|
| ह्रदम् | धनिकः |
| वैद्यम् | पाषाणाः |
| समृद्धः | सरोवरम् |
| प्रस्तराणि | चित्ते |
| मनसि | समीपे |
| पार्श्वे | चिकित्सकम् |